MSS No. 29 Subject Astrology

Name of MSS Tithinirnaya

Author Not available

Period — -- Folios 22 (00a+3 to 28)

Script Sanskrit Source Prithipal Singh

Missing Folios 1-2, 4-5, 8, 21, 26 (Incomplete)

नेप्रपादानं समारभेदिति दानशब्दोत्र उत्सर्गपरः ततश्चोत्सृजेयेद्विद्वान् मंत्रेणानेन माधव इति तत्रैवोक्तेः मंत्रश्च प्रपेयं सर्व
सर्वमासाद्यन्याभूतेभ्यः प्रतिपादिता अस्याः प्रदानात्पितरस्तृप्यंतु हि पितामहाः अनिवार्यजलं देयं ततो मासचतुष्टयमि
ति अशक्तेन धर्मघटो देय इति तत्रैवोक्तं प्रपादानमशक्तेन विशेषाद्धर्ममीप्सुना प्रत्यहं धर्मघटको वस्त्रसंवेष्टितो ननः ब्रा
ह्मणस्य गृहे देयः शीतामलजलः शुचिः घटदानेमंत्रः एषधर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः अस्य प्रदानात्सकलामम
संतु मनोरथाः अनेन विधिना यस्तु धर्मकुंभं प्रयच्छति प्रपादानफलं सोपि प्राप्नोतीह न संशय इति अस्यां तैलाभ्यंगो नि
त्यः वचनं तत्रैव दर्श्यते ज्येष्ठशुक्लप्रतिपदि दशहरारंभः तत्रः काशीखंडे ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिं द
शाश्वमेधिके स्नात्वा मुच्यते सर्वपातकैः एवं सर्वासु तिथिषु क्रमात्स्नायी नरोत्तमः आशुक्लपक्षदशमीं प्रतिजन्माघमु
त्सृजेदिति अथात्र प्रसंगाद्दशहरास्तोत्रं लिख्यते तच्च काशीखंडे चतुर्भुजां त्रिनेत्रां च सर्वावयवशोभितां रत्नकुंभ
सिताम्भोजवराभयसत्करां सितवस्त्रपरीधानां मुक्तामणिविभूषितां एवं ध्यायेत्सुसौम्यां च चंद्रायुतसमप्रभां चा

मैर्वीज्यमानांचश्वेतछत्रोपशोभितां सुप्रसन्नांचवरदांकरुणार्द्रचिरंतरां सुधाप्लावितभूपृष्ठां दिव्यगंधानुलेपनां
त्रैलोक्यनिर्मितांगंगांसर्वदेवैरधिष्ठितां दिव्यरत्नविभूषांचदिव्यमाल्यानुलेपनां ध्यात्वाजलेयथाप्रोक्तं तथार्चयी-
वत्पूजयेत् ॐनमोभगवत्यैह्रींह्रींहिलि२मिलि२गंगेमांपावय२स्वाहा अनेनमंत्रेणागमोक्तेनपंचपुष्पांजलीन्
श्रीगंगायैनिवेदयेत् मयादत्तानिपुष्पाणिपूजार्थंप्रतिगृह्यतां दशांगंगुग्गुलंधूपंसुगंधंचमनोहरं गृह्णाणमंगले
दीपंहृतवर्त्तिसमन्वितं तद्रूपेणमत्तेसुगृहाणवरदाभव परदारपरद्रव्यपरद्रोहपराङ्मुखः गंगाब्रूतेकदागत्यमा
मप्यंपावयिष्यति इतिनारदसंवादेदशपापहरायाश्रीगंगायाध्यानार्चनविधिः एवंध्यानार्चनेविधायपश्चाज्जलांतरे
स्थित्वादशपापहरायागंगायास्तोत्रपाठंकरिष्यइतिसंकल्प्य ब्रह्मोवाच ॐनमःशिवायैगंगायैशिवदायैनमोनमः
नमस्तेविष्णुरूपिण्यैब्रह्ममूर्त्यैनमोनमः नमस्तेरुद्ररूपिण्यैशांकर्यैतेनमोनमः सर्वदेवस्वरूपिण्यैनमोभेषजमूर्त्तये
सर्वस्यसर्वव्याधीनांभिषक्श्रेष्ठ्यैनमोस्तुते स्थास्नुजंगमसंभूतविषहंत्र्यैनमोनमः संसारविषनाशिन्यैजीवनायै 

पराह्णोपि नाहृशः सायाह्नस्त्रिमुहूर्त्तः स्यात्सर्वकर्मवहिष्कृतइति माधवीये व्यासोक्तेः देवीपुराणेपि प्रातरावाहयेद्देवीं प्रा
तरेव विसर्जयेदिति यत्तु सिंधुकारैर्वचनमलेखि भास्करोदयमारभ्य यावत्तु दशनाडिकाः प्रातःकाल इति प्रोक्तः स्था
पनारोपणाविधानिति विसृष्टधर्मोक्तं तन्माहात्म्यनिवंधेष्वसत्वाद्भ्रांतिमूलकमेव। अत्र यानि द्वितीयामावास्यायोगनि
षेधकानि वचनानि तानि हेमाद्र्यादिष्वसत्वान्निर्मूलानि परस्परं सत्प्रतिपक्षत्वादनिर्णायकानि चेत्युपेक्ष्याणि दिन
द्वये सर्वाह्नकाले सत्वे सत्वे वा निर्विवादं नाद्यैव अत्राद्यं नाडीषोडशकं त्यक्त्वा कलशं स्थापयेत् आद्याः षोडश नाड्यस्तु ३
लब्ध्वा यः कुरुते नरः कलशस्थापनं तत्र ह्यरिष्टं जायते ध्रुवमिति देवीपुराणे निषेधश्रुतेरिति निर्णयामृतकारः के
चित्तु आद्यास्तु नाडिकास्त्यक्त्वा षोडश द्वादशापि वेति तन्न चैवोक्तत्वात् षोडश द्वादश वा नाड्यस्त्याज्या इत्यैच्छिकवि
कल्पमाहुः ॥ इदं च कलशस्थापनं दिवैव कार्यं न रात्रौ स्थापनं कार्यं न च कुंभाभिषेचनमिति मात्स्ये निषेधात् स्था
पने वैधृत्यादियोगादि निषेधकानि वाक्यानि तान्यपि निर्मूलानि अत्राशक्तस्य त्रिरात्रैकरात्रे उक्ते देवीपुराणे नवरा

ति नवनेशक्तस्त्रिरात्रं वैकरात्रकं व्रतं चरति यो भक्तस्तस्मै दास्यामि वाञ्छितमिमिनत्त्वत्र त्रिरात्रं सप्तम्यादिदिनत्रये कार्यं तदुक्तं
हेमाद्रौ धौम्येन त्रिरात्रं चापि कर्तव्यं सप्तम्यादि यथाक्रममिति एकरात्रं तु पुत्रवद्गृहस्थभिन्नपरमुक्तं कालिकापुराणे उपवा
सं महाष्टम्यां पुत्रवान्न समाचरेदिति महाष्टमीश्चाश्विनशुक्लाष्टमी चैत्रशुक्लाष्टमी च अथ संक्षेपेण नवरात्रकृत्यं तदुक्तं
६ देवीपुराणे ॥ कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नंदिकां अयाची त्वथवैकाशी नक्ताशी वाथवाप्यद: प्रातःस्नायी जितद्वं
द्वस्त्रिकालं शिवपूजकः जपहोमसमायुक्तः कन्यकां भोजयेन्मुदा नंदिकां प्रतिपदं ननु नंदिकापदेन षष्ठ्येव गृह्यतामि
मिति चेन्न तद्ग्रहणे सति नवरात्रत्वव्याघातापत्तेः शिवा च शिवश्च शिवौ तयोः पूजकः शिवपूजकः कलशस्थापनप्रकारो रु
द्रयामले शुभाभिर्मृत्तिकाभिश्च पूर्वं कृत्वा तु वेदिकां यवान्वा वापयेत्तत्र गोधूमैश्चापि संयुतं तत्र संस्थापयेत्कुंभं विधि
ना मंत्रपूर्वकं सौवर्णं राजतं वापि ताम्रं मृन्मयजं तु वेति अथ पूजाप्रयोगः प्रातिपदि पूर्वाह्णे तिलतैलेनाभ्यक्तो य
जमानः स्नात्वा गणपतिं संपूज्य प्रथमारंभे पुण्याहवाचनादि कृत्वा देशकालौ संकीर्त्य नवरात्रपर्यंतमुपवासाद्य ६

न्यनमनियमोपेतोहदुर्गाप्रीतिद्वारासर्वापच्छांतिपूर्वकंदीर्घायुर्विपुलधनपुत्रपौत्राद्यनवच्छिन्नसंततिवृद्धिस्थिरलक्ष्मी
कीर्त्तिलाभशत्रुपराजयसर्वाभीष्टसिद्ध्यर्थंशारदनवरात्रप्रतिपदिविहितकलशस्थापनदुर्गापूजाकुमारीपूजादिक
रिष्यइतिसंकल्प्यमहीद्यौरितिभूमिंस्पृष्ट्वाओषधयःसमितियवान्क्षिप्त्वा आकलशेष्वितिॐभसंस्थाप्यइमंमेगं
इतिजलनाप्यर्यगंधद्वारामितिगंधं याओषधीरितिसर्वौषधीः कांडादितिदूर्वा अश्वत्थेवइतिपंचपल्लवान् स्योनापृ
थिवीतिसप्तमृदः यःफलिनीरितिफलं सहिरण्यानीतिपंचरत्नानि हिरण्यरूपइतिहिरण्यं युवंवस्त्राणीतिवस्त्रेणावे
ष्ट्य पूर्णादर्वीतिकलशोपरिपूर्णपात्रंनिधायवरुणंसंपूज्यहेमादिप्रतिमायांदुर्गांषोडशोपचारैःपूजयेत् पूजामंत्रस्तु
देवीपुराणे जयंतीमंगलाकालीभद्रकालीकपालिनी दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते अनेनैवतुमंत्रेणजप
होमादिकारयेदिति तत्रादौमहाकाल्यैनमः महालक्ष्म्यै० महासरस्वत्यै० प्रभायै० मायायै० जयायै० विशुद्धायै० नंदि
न्यै० प्रभायै० विजयायै० सर्वसिद्धिप्रदायै० वज्रनखदंष्ट्रायै० महासिंहासनायैनमः एभिस्त्रयोदशनामभिः पीठपूजा

ति. कृत्वादेवींध्यायेत् ध्यानमुक्तंशारदायां सिंहस्थाशशिशेखरामरकतप्रख्याचतुर्भिर्भुजैः शंखंचक्रधनुःशरांश्चदधतीने
नि त्रैस्त्रिभिःशोभिता आमुक्तांगदहारकंकणरणत्कांचीक्कणन्नूपुरादुर्गांदुर्गतिहारिणीभवतुनोरत्नोल्लसत्कुंडलेतिध्यात्वाश्वो
८ क्तमंत्रेण दुर्गायैनमइत्यनेनवाहनादिपुष्पसमर्प्पणांतंकृत्वांगपूजांकुर्यात् दुर्गायैनमःपादौपूजयामि कात्यायन्यै॰
गुल्फौ॰ सावित्र्यै॰ जानुनी सरस्वत्यै॰जंघे॰ भद्रकाल्यै॰ कटिं मंगलायै॰ नाभिं॰ शिवायै॰ उदरं क्षमायै॰ हृदयं धात्र्यै॰
हस्तौ॰ स्वधायै॰ कंठं महिषमर्दिन्यै॰ मुखं नारायण्यै॰ नासिकायां॰ रौद्रायै॰ श्रोत्रे॰ सिंहवाहिन्यै॰ नेत्रे॰ व[illegible]राह्यै॰
ललाटं कौमार्यै॰ शिरः॰ महादेव्यैसर्वांगमिति ततोधूपादिपूजांसमाप्य कूष्मांडादिबलिंनिवेद्यकुमारीपूजांकुर्या
तदुक्तंनवरात्रप्रकरणेदेवीपुराणे॥ नतथातुष्यतेशक्रजपहोमसमाधिना कुमारीपूजनेनात्रयथादेवीप्रसीदति अ
त्रनवरात्रेकुमारीपूजामंत्रस्तुस्कंदे मंत्राक्षरमयींलक्ष्मींमातॄणांरूपधारिणीं नवदुर्गात्मिकांसाक्षात्कन्यामावाह
याम्यहं जगत्पूज्येजगद्वंद्येसर्वशक्तिस्वरूपिणी पूजांगृहाणकौमारीजगन्मातर्नमोस्तुतेइति कुमारीवयःप्रमा

हाभिसारिकं कर्म प्रोक्तं मदनरत्ने भविष्ये जयाभिलाषी नृपतिप्रतिपत्प्रभृतिक्रमात् लोहाभिसारिकं कर्म कारयेद्या
वदष्टमी तद्विधानं प्रवक्ष्ये तत्रैव प्रागुदक्प्रवणे देशे पताकाभिरलंकृतं मंडपं कारयेद्दिव्यं नवसप्तकरं परं षोडशहस्तमि
त्यपरे: आग्नेय्यां कारयेत्कुंडं हस्तमात्रं सुशोभितं मेखलात्रयसंयुक्तं योन्याश्वत्थदल[illegible]तथा राजचिह्नानि सर्वाणि शस्त्रा
ण्यस्त्राणि यानि च आनीय मंडपे तानि सर्वाण्येवाधिवासयेत् ततस्तु ब्राह्मणः स्नातः शुक्लांबरधरः शुचिः ओंकारपूर्वकैर्मंत्रै
स्तल्लिंगैर्जुहुयाद्धुतं शस्त्रास्त्रमंत्रैर्लौहैर्नव्यपायसं घृतसंयुतं हुतशेषं तुरंगाणां राज्ञानमुपहारयेत् लोहाभिसारिकं कर्म
तेनैन हस्तिभिः स्मृतं घृतपल्ययनानश्वान् गजांश्च समलंकृतान् भ्रामयेन्नगरे नित्यं नंदिघोषपुरःसरं प्रत्यहं नृपतिः
स्नात्वा संपूज्य पितृदेवताः पूजयेद्राजचिह्नानि फलमाल्यविभूषणैः राजचिह्नानि शस्त्राश्वादीनि लोहनामाभवत्पू
र्वमसुरः स महाबलः स देवैः समरे क्रुद्धैर्वज्रधाशकलीकृतः तदंगसंभवं सर्वं लोहं यद्दृश्यते क्षितौ तस्याभिसरणाद्रा
ज्ञो विजयः समुदाहृतः अभिसरणउर्ध्वं रत्नि[illegible]र्कर्म कार्यं जयाभिलाषीति फलश्रवणात् अत्र शास्त्रस्यैव प्रधा

नि नि ९

नेफलसंबंधात् अथायुधादिषु जोमवाञ्गमं रविं च स्तुथर्मीन्नरे तत्रादौ छत्रस्य यथांबुदच्छादयति शिवायेमां वसुंधरां
तथाच्छादय राजानं विजयारोग्यवृद्धये अथाचामरस्य शशांककरसंकाशक्षीरडिंडीरपांडुर प्रोत्सारयाशु दुरितं चाम
रामरदुर्लभ अथाश्वस्य गंधर्वकुलजातस्त्वं माभूयः कुलदूषकः ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च प्रभावाच्च
हुताशस्य वर्धयत्वं तुरंगमान् तेजसा चैव सूर्यस्य मुनीनां तपसा तथा रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन च स्मरत्वं
राजपुत्रस्त्वं कौस्तुभं च मणिं स्मर यां गतिं ब्रह्महा गच्छेन्मातृहा पितृहा तथा भूमिहानृतवादी च क्षत्रियश्च पराङ्मुखः ॥
सूर्याचंद्रमसौ वायुर्यावत्पश्यंति दुष्कृतं ब्रजाश्च तां गतिं क्षिप्रं तच्च पापं भवेत्तव विकृतिं त्वादिगच्छेथा युद्धाध्वनि तुरंगम ।
रिपून् विजित्य समरे सह भर्त्रा सुखी भव अथ ध्वजस्य शक्रकेतो महावीर्य श्यामवर्ण चेरुम्यहं पत्रिराज नमस्तेस्तु तथा ना
रायणध्वज काश्यपेयामृताहरण भ्रातर्नागारे विष्णुवाहन अप्रमेय दुराधर्ष रणे देवारिसूदन गरुत्मन्मारुतगतिस्त्वयि संनि
हितो यतः साश्ववर्मायुधान्योधान् रक्षास्मांश्च रिपून्दह अथ पताकायाः कुनभुग्व सवोरुद्रा वायुः सोमो महर्षयः ।

नागकिंनरगंधर्वयक्षभूतगणग्रहाः प्रमथास्तुसहादित्यैर्भूतेशोमातृभिःसह शक्रःसेनापतिःस्कंदोवरुणश्चाश्रितस्त्व
यि प्रदहंतुरिपून्सर्वान्राजाविजयष्टकृतु यानिप्रयुक्तान्यरिभिरायुधानिसमंततः पतंतु परिशत्रूणांहतानितवते
जसा हिरण्यकशिपोर्युद्धेयुद्धेदेवासुरेतथा कालनेमिवधेयद्वद्यद्वत्त्रिपुरघातने शोभितासितथैवाद्यशोभयास्मांश्च
संस्मर नीलान्श्वेतानिमानृदृष्ट्वानश्यंत्वाशुतृपारयः व्याधिभिर्विविधैर्घोरैःशस्त्रैश्चयुधिनिर्जिताः भूतनारेवतीना
म्नाकालरात्रिश्चयाभृता दहन्त्वाशुरिपून्सर्वान्पताकेत्वमथार्चिता अथहस्तिनःकुमुदैरावणः पद्मःपुष्पदंतोथ
वामनः सुप्रतीकोञ्जनोनीलएतेष्टौदेवयोनयः तेषांपुत्राश्चपौत्राश्चवनान्यष्टौसमाश्रिताः मंदोभद्रोमृगश्चैवगजः
संकीर्णएवच वनेवनेप्रसूतास्तेस्मरयोनिंमहागज यांतुत्वांवसवोरुद्राआदित्याःसमरुद्गणाः भर्तारंरक्षनागेंद्र
स्वामिवत्प्रतिपाल्यतां अवाप्नुहिजयंयुद्धेगमनेस्खलितोव्रज श्रीस्तेसोमाद्बलंविष्णोस्तेजःसूर्याज्जवोनिलात् स्थै
र्यंमेरोर्जयंरुद्राद्यशोदेवात्पुरंदरात् युद्धेरक्षंतुनागास्त्वांदिशश्चसरुदैवतैः अश्विनौसहगंधर्वैःपांतुत्वांसर्वतःसदा अ

नि. यखड्गस्य अस्मिर्विशसनस्तः खड्गस्तीक्ष्णधारो दुरासदः श्रीगर्भो विजयश्चैव धर्मधारस्तथैव च एतानि तव नामानि स्वयमुक्ता
नि. नि वेधसा नक्षत्रं कृत्तिका तेन तु गुरुर्देवो महेश्वरः रोहिण्यश्च शरीरं ते दैवतं च जनार्दनः पिता पितामहो देवस्त्वं मां पाल
१० य सर्वदा नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रः कृशोदरः भावशुद्धो ऽमर्षणश्च अतितेजास्तथैव च इयं येन धृता क्षोणी हतश्च
महिषासुरः तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते अथ छुरिकायाः ॥ सर्वायुधानां प्रथमं निर्मितासि पिनाकिना शूलायु
धाद्विनिष्कृष्य कृत्वा मुष्टिग्रहं शुभं चंडिकायाः प्रदत्तासि सर्वदुष्टनिवर्हिणी तया विस्तारिता चासि देवानां प्रतिपादिता स 10
र्वसत्वांगभूतासि सर्वाशुभनिवर्हिणी छुरिके रक्ष मां नित्यं शांतिं यच्छ नमोस्तु ते अथ कटारिकायाः रक्षांगानि गजा
न् रक्ष रक्ष वाजिधनानि च ममदेहं सदा रक्ष कटारक नमोस्तु ते अथ धनुषः सर्वायुधमहामात्र सर्वदेवारिसूदन चा
प मां समरे रक्ष साकं शरवरैरिह धृतः कृत्स्नेन रक्षार्थं संहाराय हरेण च त्रयीमूर्तिगतं देव धनुरस्त्रं नमाम्यहं अथ कुंत
स्य प्रासपातय शाङ्गं त्वमनयानाकमायया गृह्णाणजीवितं तेषां मम मैत्र्यं चरन्ततां अथ वर्मणः शर्मप्रदस्त्वं समरे द १७

मेसैन्येयद्रोयमे रक्षमांरक्षणीयोहंतापनेयनमोस्तुते अथस्वर्णदंडस्य प्रोन्मारणायदुष्टानांसाधुसंरक्षणायच ब्रह्म
णानिर्मितश्चासिव्यवहारप्रसिद्धये यशोदेहिसुखंदेहिजयदोभवभूपते: ताडयस्वारिशत्रून्सर्वान्हेमदंडनमोस्तुते अ
थदुंदुभेः दुंदुभेत्वंसपत्नानांघोषैर्हृदयकंपनः भवभूमिपसैन्यानांतथाविजयवर्द्धनः यथाजीमूतघोषेणप्रहृष्यंति
चबर्हिणः तथास्तुतवशब्देनहर्षोस्माकंमुदावह: यथाजीमूतशब्देनस्त्रीणांत्रासोभिजायते तथानेनचशब्देनत्रस्यंत्व
स्मद्विषोरणे अथसिंहासनस्य विजयोजयदोनेतारिपुघातीभयंकरः दुःखहाधर्मदःशांतःसर्वारिष्टविनाशनः नमस्ते
सर्वतोभद्रभद्रदोभवभूपतेः त्रैलोक्यजयसर्वस्वसिंहासननमोस्तुते इतिस्नानमंत्राः॥ इयमेवदौहित्रप्रतिपत् अस्यां
मातामहश्राद्धंकार्यं तदुक्तंहेमाद्रौस्मृतौ जातमात्रोपिदौहित्रोविद्यमानेपिमातुले कुर्यान्मातामहश्राद्धंप्रतिपद्याश्विने
सितेइति अथकार्त्तिकशुक्लप्रतिपत्सापूर्वविद्धाग्राह्या पूर्वविद्धाप्रकर्तव्याशिवरात्रिर्बलेर्दिनमितिवृद्धयमोक्तेः अत्रापि
तैलाभ्यंग आवश्यकस्तदुक्तंवृद्धवशिष्ठेन वत्सरादौवसंतादौबलिराज्येतथैवच तैलाभ्यंगमकुर्वाणोनरकंप्रतिपद्यत

ति इति इदं वाभ्यंगे स्वर्योदयव्यापिनी ग्राह्या तदुक्तं ज्योतिर्निबंधे नंदायामुदयेभ्यंगं कृत्वा नीराजनं ततः सुवेषः सत्कथा गीते
नि दानैश्च दिवसं नयेत् हेमाद्रौ बलिप्रतिपदुपक्रमे तस्माद्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः तस्मिन् द्यूते जयो यस्य तस्य संव
११ त्सरं शुभः पराजयो विरुद्धश्च लाभनाशकरो भवेत् दयिताभिश्च सहितैर्नेया सा च भवेन्निशेति अत्र कृत्यांतरं हेमाद्रौ भवि
ष्ये प्रातर्गोवर्द्धनः पूज्यो द्यूतं चापि समाचरेत् पूजनीयस्तथा गावस्त्याज्ये वाहनदोहने पर्वतगवोः पूजामंत्रौ तत्रैव गो
गोवर्द्धन धराधार गोकुलत्राणकारक बहुबाहुकृतच्छाया गवां कोटिप्रदो भव लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थि
ता घृतं वहति यज्ञार्थे मम पापं व्यपोहतु अत्र रात्रौ बलिपूजा कार्या तदुक्तं हेमाद्रौ भविष्ये कृत्वैतत्सर्वमेवेह रात्रौ दैत्य
पतिं बलिं गृहस्य मध्ये शालायां विशालायां ततोर्चयेत् लोकश्चापि गृहस्यांतः शय्यायां शुक्लतंदुलैः संस्थाप्य बलिरा
जं तु फलैः पुष्पैश्च पूजयेत् पूजामंत्रः पाद्मे बलिराज नमस्तुभ्यं दैत्यदानववंदित इंद्रशत्रोमरारातेविष्णुसान्निध्य
दो भवेत् चैत्रकृत्यस्य प्रतिपदिश्च परस्पर्शो दोलिकाविभूतिवंदनं चूतकुसुमप्राशनं च कार्यमित्युक्तं भविष्योत्तरे चैत्र ११

मासिमत्वावाहोपुण्णापत्रनिपदापरा यस्तस्याग्रपवंसरुष्ट्वास्नानंकुर्यादिद्वजोत्तमम्‌ ननस्यदुरितंकिंचिन्नाधयोव्याधयोत्र
प तथा प्रष्टनेमधुमासेतुप्रतिपत्सुविभूतये कृत्वाचावश्यकार्याणिसंतर्प्यपितृदेवता: वंदयेद्धोलिकाभूतिंसर्व
दु:खोपशांतये विभूतिवंदनेमंत्र: वंदितासिसुरेंद्रेणब्रह्मणाशंकरेणच अतस्त्वंपाहिनोदेविविभूतेभूतिदाभवेत्‌
पुराणसमुच्चये वृत्तेतुधारसमयेस्थितपंचदशीप्रातर्वसंतसमयेसमुपस्थितेच संप्राश्यचूतकुसुमंसहचंदनेन
सत्यंहिपार्थपुरुषोथसमांसुखीस्यात्‌ समामितिकालाध्वनोरत्यंतसंयोगइतिद्वितीया॥ कुसुमप्राशनेमंत्र:॥ ॥
चूतमग्र्यंवसंतस्यमाकंदकुसुमंतव सचंदनंपिबाम्यद्य सर्वकामार्थसिद्धयइति। इदंचपूर्वविद्धायामेव वत्स
वत्सरादौवसंतादौबलिराजेतथैवच पूर्वविद्धैवकर्तव्याप्रतिपत्सर्वदाबुधैरितिद्वसिष्ठवाक्यात्‌ अत्रवेधमाहापै
ठीनसि: पक्षद्वयेपितिथयस्तिथिंपश्यंतिनागत्वा त्रिभिर्मुहूर्तैर्विध्यंतिसामान्योयंविधि:स्मृतइति हिमाद्र्यादिधृतवउ
दितेदैवतंभानौपित्र्यंचास्तमितेरवौद्विमुहूर्तंत्रिरह्नश्चसातिथिर्हव्यकव्ययोरितिविरुद्धमौनात्राद्विमुहूर्तोपयुक्तोवेध:॥

ति वस्तुतस्तु द्विमुहूर्त्तो न कर्त्तव्या या तिथिः क्षयगामिनी द्विमुहूर्त्तापि कर्त्तव्या या तिथिर्वृद्धिगामिनीति दक्षवचनेपि का
नि रपाठाद्विमुहूर्त्तत्वमनुकल्पः अस्याश्चाभ्यांगो नित्यः पूर्वोक्तवाक्यात् प्रतिपच्छुक्केण सिद्धा भौमबुधाभ्यां विरुद्धा
१२ योगिन्यस्यां पूर्वस्यामिति प्रतिपन्निर्णीता॥ ॥अथ द्वितीया निर्णीयते॥ ॥सा तु परैव तदुक्तं विष्णुधर्मोत्तरे एकाद
श्यष्टमी षष्ठी द्वितीया च चतुर्दशी त्रयोदशी अमावास्या उपोष्याः स्युः परान्विता इति चैत्रशुक्लद्वितीयायामुमापूजा
शिवपूजाग्निपूजा च कार्येत्युक्तं भविष्योत्तरे चैत्रशुक्लद्वितीयायामुमापूजाफलार्थिभिः शिवपूजाग्निपूजा च क 12
र्त्तव्या मुनिसत्तमेति देवीपुराणे उमाशिवं हुताशं च द्वितीयायां प्रपूजयेत् हविष्यमन्नं नैवेद्यं देयं गंधार्चनान्वि
तं फलमाप्नोति विप्रेंद्र सर्वक्रतुसमुद्भवमिति ज्येष्ठशुक्लद्वितीया सोपपदा तदुक्तं कालादर्शे सिता ज्येष्ठे द्वितीया
च आश्विने दशमी सिता चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृताः अत्र वेदाध्ययनादि निषिद्धमुक्तं नारदीये
युगादिषु च सर्वासु तथा मन्वंतरादिषु अनध्यायं प्रकुर्वीत तथा सोपपदातिथिष्विति आषाढशुक्लद्वितीयायां रा १२

मयात्रोत्सवःकार्यः तथाचस्कांदे आषाढस्यसितेपक्षे द्वितीयापुष्यसंयुता तस्यांरथेसमारोप्यरामंवैभद्रया।
सह यात्रोत्सवंप्रवर्त्याथप्रीणयेन्नद्विजान्बहून् ऋक्षाभावेतिथौकार्यायात्रासाप्रीतयेममेति श्रावणकृष्ण
द्वितीयाअशून्यशयनोच्यते सापूर्वविद्धाग्राह्या तदाहसंवर्त्तः कृष्णाष्टमीस्कंदतल्या सावित्रीवटपैत्रिकी कामत्रयो
दशीरंभाउपोष्याःपूर्वसंयुताइति चातुर्मास्यकृष्णद्वितीयास्तुचतस्रएषअशून्याख्यंव्रतंकुर्यादित्युक्तंनिर्ण
यामृतेपुराणसमुच्चये चतुर्ष्वसितपक्षेषुमासेषुश्रावणादिषु अशून्याख्यंव्रतंकुर्याज्जययातुफलाधिकमिति
नयात्तृतीया कार्त्तिकशुक्लद्वितीयायमद्वितीयोच्यते सापराह्णव्यापिनीग्राह्या कर्मकालवाक्यात् तदुक्तंहे।
माद्रौस्कंदे ऊर्ज्जेशुक्लद्वितीयायामपराह्णेर्चयेद्यमं स्नानंकृत्वाभानुजायांयमलोकंनपश्यति ऊर्ज्जेशुक्लद्वितीयायां
पूजितस्तर्पितोयमः वेष्टितःकिंनरैर्हृष्टैस्तस्मैयच्छतिवांछितमिति गौडास्तुविशेषमाहुः यमंचचित्रगुप्तंचयम
दूतांश्चपूजयेत् चित्रगुप्तस्यशर्मांचकुर्याज्ज्ञानस्यवृद्धये मासीपात्रंलेखनींचपूजयेच्चप्रयत्नतः सर्वान्का

ति मानवाप्नोति यमलोकं न पश्यतीति ॥ अस्यां भगिनीगृहे भोक्तव्यमित्युक्तं भविष्ये कार्त्तिके शुक्लपक्षस्य द्वितीयायां द्वि
नि तीयायां युधिष्ठिर यमो यमुनया पूर्वं भोजितः स्वगृहेऽर्चितः अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता अस्यां निजगृहे वि
प्र न भोक्तव्यं ततो नरैः स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनं दानानि च प्रदेयानि भगिनीभ्यो विशेषतः स्वर्णालंका
१३ रवस्त्रान्नपूजा सत्कारभोजनैः सर्वा भगिन्यः संपूज्या अभावे प्रतिपन्नका इति प्रतिपन्निका भगिन्य इति हेमाद्रिः
ये त्वस्यां ते ऽपि यानु भोजयते नारी भ्रातरं युग्मके तिथौ अर्चयेच्चापि तांबूलैर्न सा वैधव्यमाप्नुयात् भ्रातुरायुःक्षयो राजन्न भ 13
वेत्तत्र कर्हिचित् चैत्रशुक्लद्वितीयां काममहोत्सव उक्तो भविष्ये ततः प्रातर्द्वितीयायां पुत्रमित्रादिसंयुतः नृपनिर्वित
ते देशे विमानवरशोभिते नृत्यगीतविनोदैश्च कुर्यात्काममहोत्सवं एवं कुर्वन्नवाप्नोति यावत्संवत्सरं सुखमिति त
तः प्रतिपद्युत्सवानंतरमित्यर्थः अयं चोत्सवः पूर्वविद्धायामेव प्रतिपत्सद्वितीयास्या द्वितीया प्रतिपद्युतेति व
दपमाणयुग्मवाक्यात् द्वितीया बुधेन सिद्धा शुक्रेण विरुद्धा अत्र योगिन्युत्तरस्यामिति ॥ ॥ इति द्वितीयानिर्णीता ॥

अथ तृतीया निर्णीयते सा तु परैव ॥ ॥ सा तु परैव तदुक्तं विष्णुधर्मोत्तरे एकादश्यष्टमीषष्ठीपौर्णमासीचतुर्दशी
अमावास्या तृतीया च ता उपोष्याः परान्विता इति रंभाव्रते तु पूर्वैव तदुक्तं ब्रह्मवैवर्त्ते रंभाख्यां वर्जयित्वैकां तृती
यां द्विजसत्तम अन्येषु शुभकार्येषु गणयुक्ता प्रशस्यत इति गणश्चतुर्थी चैत्रशुक्लतृतीयायां दोलोत्सवउक्तो रा
मार्चनचंद्रिकायां गारुडे चैत्रे मासि सिते पक्षे तृतीयायां रमापतिं दोलारूढं समभ्यर्च्य मासमांदोलयेत्कलाविति
गौरीतृतीयाप्ययमेव अस्यां गौरीमीश्वरयुतां संपूज्य दोलोत्सवं कुर्यात् तदुक्तं निर्णयामृते देवीपुराणे तृती
यायां यजेद्देवीं शंकरेण समन्वितां आंदोलयेत्ततो वत्स शिवया सहितं शिवमिति अत्र मुहूर्त्तमात्रापि परा ग्राह्या त
दाह माधवः मुहूर्त्तमात्रसत्वेपि दिने गौरीव्रतं परे शुद्धाधिकायामप्येवं गणयोगप्रशंसनादिति स्कंदेपि कलाकाष्ठा
पिवाचेव द्वितीया संप्रदृश्यते सा तृतीया न कर्त्तव्या कर्त्तव्या गणसंयुतेति यदा त्वत्र दिने स्वल्पापि तृतीया न लभ्यते त
दा द्वितीयाविद्धैव कार्या एकादशी तृतीया च षष्ठी चैव त्रयोदशी पूर्वविद्धैव कर्त्तव्या यदि न स्यात्परेऽहनीति वृद्धव

ति सिष्टोक्तेः अत्र सौभाग्यव्रतमुक्तं मात्स्ये वसंतमासमासाद्य तृतीयायां जनप्रिये सौभाग्याय सदा स्त्रीभिः कार्यं पुत्रसुखे
नि प्सुभिरिति मत्स्यजयंत्यपीयमेव मत्स्योऽभूत्तु नभुग्दिने मधुसिते इति वाक्यात् वैशाखशुक्लतृतीयात्वत्यतृतीयोच्य
१४ ते तदुक्तं भविष्ये यात्वेषा कृतशार्दूल वैशाखे तु महातिथिः तृतीया साक्षया लोके गीर्वाणैरभिवंदिता यत्किंचिद्दी
यते दानं स्वल्पं वा यदि वा बहु तत्सर्वमक्षयं यस्मात्तेनेयमक्षया स्मृतेति इयं युगादिः साऽपूर्वाह्णव्यापिनी ग्राह्या त
दुक्तं नारदीये द्वे शुक्ले द्वे तथा कृष्णे युगादी कवयो विदुः शुक्ले पौर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके इति वैशाखशुक्ले
तृतीया कार्तिकशुक्लनवमीति द्वे शुक्ले युगादी भाद्रशुक्लत्रयोदशी माघमासस्यामेति द्वे कृष्णे युगादी प्रमाणवच 14
नं तु नवमीप्रकरणे वक्ष्यते अत्र पितृप्रीत्यर्थं कुंभदानमुक्तं देवीपुराणे तृतीयायां तु वैशाखे रोहिण्यर्क्षे प्रपूज्य तु
उदकुंभप्रदानेन शिवलोके महीयते कुंभदाने मंत्रः एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः अस्य प्रदानात्तृप्यंतु पित
रोऽपि पितामहाः गंधोदकतिलैर्मिश्रं सान्नं कुंभं सदक्षिणं पितृभ्यः संप्रदास्यामि अक्षय्यमुपतिष्ठत्विति एतदसंभवे १४

गोविंदार्णवे विष्णुपुराणे पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्य इति अस्यां त्रिलोचनयात्रोक्ता
काशीखंडे राधशुक्लतृतीयायां स्नात्वा पैलिप्पिलेश्वरे संतर्प्य पितॄन्देवान् त्रिलोचनमथार्चयेदिति ॥ इयमेव
परशुरामजयंती माधवे रामो गौरितिथ्याविति वाक्यात् सा प्रदोषव्यापिनी ग्राह्या तदुक्तं स्कांदे वैशाखस्य सिते
पक्षे तृतीयायां पुनर्वसौ निशायां प्रथमे यामे रामाख्यः समहाहरिः स्वोच्चगैः षड्ग्रहैर्युक्ते मिथुने राहुसंयुते रेणु
कायास्तु यो गर्भादवतीर्णो हरिः स्वयमिति दिनद्वये तद्व्याप्तौ तूत्तरा अन्यथा पूर्वैव तदुक्तं भविष्ये शुक्लातृतीया
वैशाखे शुद्धा पोष्या दिनद्वये निशायाः पूर्वयामे चेदुत्तरान्यत्र पूर्विकेति दिनद्वये निशायामित्यन्वयः यदा वैशाखो
मलमासस्तदा युगादिप्रयुक्तं कार्यं मल एव कर्त्तव्यं दशाहरास्तु नोत्कर्षश्चतुर्थ्यपि युगादिष्विति ऋष्यशृंगवचना
दिहेमाद्र्यादयो वदंति स्मृतिचंद्रिकायां तु विशेषः यौगादिकं मासिकं च श्राद्धं चापरपक्षिकं मन्वादिकं तैर्थिकं
च कुर्यान्मासद्वयेपि चेति अपरपक्षिकं कृष्णपक्षसंभवं ननु महालयश्राद्धं न कुर्याद्भानुलंघितइत्यादिनातं

ति निषेधात् ज्येष्ठशुक्लात्तृतीयारंभात्तृतीयोच्यते तदुक्तं माधवीये भविष्ये भद्रेकृष्णपक्षेनरंभाख्यंव्रतमुत्त
नि मं ज्येष्ठशुक्लतृतीयायांस्नातानियमतत्परेति साष्टवी तदुक्तं ब्रह्मवैवर्ते रंभाख्यंवर्जयित्वैकांतृतीयायांद्वि
१५ जसत्तम सर्वेष्वेषु शुभकार्येषु गणयुक्ताप्रशस्यते भाद्रकृष्णतृतीयायां विशालाक्षीयात्राकार्या रात्रौजाग
रणविधानादियंरात्रिव्यापिनीग्राह्या तदुक्तं काशीखंडे भाद्रकृष्णतृतीयायामुपवासपरैर्नृभिः कृत्वाजाग
रणंरात्रौविशालाक्षीसमीपत इयमेवकज्जलीभाद्रस्य कज्जलीकृष्णा शुक्लाचहरितालिकेति दिवोदासो
दाहृतवचनात् भाद्रशुक्लतृतीयाहरितालिकादिवोदासोदाहृतवचनात् इयंमुहूर्त्तमात्रापि गौरीव्रत
त्वात्परयुताग्राह्या मुहूर्त्तमात्रंसत्वेपिदिने गौरीव्रतंपरइतिमाधववचनात् आश्विनकृष्णतृतीयायांललि
तादेव्यायात्रोक्ताकाशीखंडे इषकृष्णतृतीयायांललितांप्रतिपूज्यवै नारीवापुरुषोवापिलभतेवांछितं 15
फलमिति अत्रगणयुक्ताग्राह्या रंभाख्यांवर्जयित्वैकमितिसर्वमुक्तत्वात् तृतीयाभौमेनसिद्धा बुध १५

न विरुद्धा अस्यां योगिन्यां नेय्यामिति तृतीया निर्णीता अथ चतुर्थी निर्णीयते सा परविद्धा ग्राह्या
एकादशी तथा षष्ठी अमावास्या चतुर्थिका उपोष्याः परसंयुक्ताः परा पूर्वेण संयुता इति माधवीय वृद्धवा
सिष्ठवाक्यात् विनायकव्रते तु तृतीयायुतैव तदुक्तं गोविंदार्णवे चतुर्थी तु तृतीयायां महापुण्यफलप्रदा
कर्तव्या व्रतिभिर्वत्स गणनाथसुतोषणीति चैत्रशुक्लचतुर्थी विघ्ननाशिनी तत्र लड्डुकैर्गणेशं जयेदित्युक्तं
निर्णीयामृते देवीपुराणे चतुर्थीप्रकरणे गणेशं कारयेत्सूज्ञं लड्डुकादिभिरादरात् चतुर्थ्यां विघ्ननाशाय स
र्वकार्यार्थसिद्धये इति गणेशमिति षष्ठ्यर्थे द्वितीया ज्येष्ठशुक्लचतुर्थ्यां स्त्रीभिः सौभाग्यवृद्धये उमा पूज्येत्यु
क्तं भविष्ये ज्येष्ठशुक्लचतुर्थ्यां तु जाता पूर्वं उमा सती तस्मात्सा तत्र संपूज्या स्त्रीभिः सौभाग्यवृद्धय इति
अत्र सामान्यनिर्णयः नागचतुर्थी तु माध्याह्नव्यापिनी ग्राह्या तदाह गोविंदार्णवे देवलः युगं मध्यंदिनं य
त्र तत्रोपोष्य फणीश्वरान् क्षीरेण प्याप्य पंचम्यां पारयेत्प्रयतो नरः विषाणि तस्य नश्यंति न तं हिंसंति य

ति
त्रगा इति अस्यार्थः चतुर्थ्यां मध्याह्नव्यापिन्यामुपवासं संकल्प्य चंदनादिना नागान् संपूज्य क्षीरनैवेद्येनाप्याय
नि
स्वयं पंचम्यां पारणं कुर्यात्तेन सर्वरोगनाशः सर्पादिदंशश्च न भवतीति श्रावणकृष्णचतुर्थी संकष्टचतुर्थीत्यु
१६
च्यते तदुक्तं स्कांदे श्रावणे बहुले पक्षे चतुर्थ्यां च विधूदये तस्मिन् दिने व्रतं कार्यं संकष्टाख्यं सुरेश्वरीति श्राव
णोत्रामांतो ज्ञेयः विधुश्चंद्रः एतस्मादेव वचनादियं चंद्रोदयव्यापिनी ग्राह्या दिनद्वये चंद्रोदये सत्त्वेऽसत्त्वे वा मा
तृविद्धा प्रशस्यत इति वाक्यशेषात्पूर्वैव भाद्रकृष्णचतुर्थी बहुलाव्रते पूर्वैव पंचमीयुक्तनिषेधात् तदुक्तं गोविंदा
र्णवे पुराणसमुच्चये गौर्याश्चतुर्थी वटधेनुपूजा दुर्गार्चनं दुर्भरहोलिका च॥ वत्सस्य पूजा शिवरात्रिरेताः परा
न्विता हंति नृपं सराष्ट्रमिति इयं मध्यदेशे प्रसिद्धा भाद्रशुक्लवरदचतुर्थी सा मध्याह्नव्यापिनी ग्राह्या पूर्वविद्धे।
मध्याह्नव्याप्त्यभावे परदिने मध्याह्नसत्त्वे परैव तथा च स्मृत्यंतरे मातृविद्धा प्रशस्ता च चतुर्थी गणनायके मुख्या
ह्ने परतश्चेत्स्यान्नागविद्धा प्रशस्यत इति सिद्धिविनायकव्रतेपि प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृपे १६

16

तिमध्याह्नस्पृग्जाकालत्वान्मध्याह्नव्यापिन्येव ग्राह्या दिनद्वये तद्व्याप्त्यभावे व्याप्तौ वा मातृविद्धा प्रशस्यत इति
वाक्यात् पूर्वैव द्वितीयदिने मध्याह्नव्याप्तिसत्वे पूर्वेद्युर्दिने मध्याह्नव्याप्त्यभावे परैव चतुर्थी ॥ गणनाथस्य मा
तृविद्धा प्रशस्यते मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेहनीति माधवीये बृहस्पत्युक्तेः इयमर्कभौमान्यतरवासरेण
न्विता चेन्निप्रशस्तेत्युक्तं निर्णयामृते वराहपुराणे भाद्रशुक्लचतुर्थी या भौमेनार्केण वा युता महती सात्र विघ्नेशमर
चित्वेष्टं लभेन्नर इति अत्र चंद्रदर्शननिषेधमाह पराशरः कन्यादित्ये चतुर्थ्यां तु शुक्ले चंद्रस्य दर्शनं मिथ्याभिदूष
णं कुर्यात्तस्मात्तं पश्येन्न तं सदा तद्दोषशांतये सिंहः प्रसेनमिति वै पठेदिति अत्र रात्रिग्रहणाद्दिवा दर्शने न दोष इति
निर्णयामृतकारादयः युक्तं तु भाद्रे मासि सिते पक्षे चतुर्थी स्वातियोगिनी मिथ्याभिशापं कुरुते दृष्टश्चंद्रान
संशयं इति मार्कंडेयादिवचनांतरेषु चतुर्थीमात्रग्रहणाद्दिवा चंद्रो न द्रष्टव्य इति प्रतिभाति प्रमादाच्चंद्रदर्श
नेन तद्दोषशांत्यर्थं प्राङ्मुखः उदङ्मुखो वा पौराणं वाक्यं पठेत् तच्च सिंहः प्रसेनमवधीत्सिंहो जांबवता हतः

ति. सुकुमारकिमारोदीस्त्वं ह्येष समंतक इति इयमेव शिवाख्येत्युक्तं भविष्ये शिवाशांतानास्तु स्वाराज्ञश्चतुर्थी त्रिविधा
वि. स्मृता मासि भाद्रपदे शुक्ला शिवलोके प्रपूजिता तस्यां स्नानं तथा दानं उपवासो जपस्तथा क्रियमाणं शतगुणं
१२ प्रसादाद्दंतिनो नृपेति मार्गशुक्लचतुर्थी वरदचतुर्थी तस्यां सर्वार्थसाधकमहं चतुष्टयसाध्यं व्रतमुक्तं स्कंदपु
राणे। चतुर्थ्यां मार्गशीर्षे तु शुक्लपक्षे नृपोत्तम प्रारभ्य प्रतिमासं च चतुर्थ्यां गणनायकं संपूज्य विधिना कुर्या
देकभक्तं समाहितः अब्दात्तु लवणं त्वेवं पूर्वे संवत्सरे ततः द्वितीये वत्सरे चाप्यनक्तं प्रति चतुर्थिकां कुर्याद्गण 17
शमभ्यर्च्य तृतीये याचितस्तथा एवमेवं प्रकुर्वीत चतुर्थे स्यादुपोषणं ततश्चतुर्थे संपूर्णे तदुद्यापनमाचरेत्
इदं वरदचतुर्थ्याख्यं व्रतं सर्वार्थसाधकमिति अत्र प्रथमवर्षे एकभक्तमुक्तं तत्स्वरूपमाह देवलः दिनार्द्धसमये
तीते भुज्यते नियमेन यत् एकभक्तमिति प्रोक्तं न्यूनं ग्रासत्रयेण तु ननु भोजनं ग्रासत्रयेण न्यूनं कथं ज्ञातव्य १२
मिति चेदुच्यते भोजनं तु विधिप्राप्तद्वात्रिंशद्ग्राससंमितं तद्ग्रासत्रयेण न्यूनमित्यं त्यपादेनोच्यते तेनैकभक्ते

नत्रिंशद्ग्रासादिति फलितोऽर्थः भोजनेद्वात्रिंशद्ग्रासादिनियमस्तु मत्कृताचारार्केंदुष्वद्यः पद्मपुराणे ।मध्याह्नव्यापिनी
ग्राह्या एकभक्तव्रते तिथिरिति बौधायनेपि उदयेत्स्वपवासेनक्तस्यात्सर्मयेतिथिः मध्याह्नव्यापिनीग्राह्या ए
कभक्तव्रते तिथिरिति अत्रत्रेधाविभक्तस्याह्नोमध्यमभागोमध्याह्नः सर्वाह्णेदेवाश्चशनमभिहरंतिमध्यंदिनेम
नुष्याश्चपराह्णेपितरइतिश्रुतेः द्वितीयेनक्तमुक्तं तदाह व्यासः त्रिमुहूर्तः प्रदोषः स्याद्भानावस्तंगतेसति न
क्तं तत्र प्रकुर्वीत इतिशास्त्रस्य निश्चय इति नक्तशब्दो भोजनपरः अत्रकेचित् चत्वारीमानिकर्माणि संध्यायां परि
वर्जयेत् आहारंमैथुनंनिद्रांस्वाध्यायंच चतुर्थकमिति वचनात्सायंसंध्या त्रिघटिकाह्यस्तादुपरिभास्वतइति
स्कांदोक्तसंध्यायां भोजनंनिषिद्धमित्याहुस्तदशुद्धं किंचिदालक्ष्यतारकाकालरूपमुख्यसंध्याशब्दार्थत्यागे
मानाभावात् तथाचहेमाद्रौस्मृत्यंतरे नक्षत्रदर्शनात्संध्यासायंतत्परतःस्थितं तत्पराराजनीज्ञेया तत्रधर्मा
न्विवर्जयेदिति अस्तवाद्यटिकात्रयं संध्याशब्दवाच्यं तथापि तत्ररागप्राप्तं भोजनं निषिद्धं नतु वैधं विधिस्पृष्टे ।

ति निषेधानवकाशात् वत्सः प्रदोषव्यापिनी ग्राह्या सदा नक्तव्रते तिथिः एकादशीं विना सर्वा शुक्ले कृष्णे विशेषतः
ति ति हरिनक्तव्रते तूदयव्यापिनी ग्राह्या तदुक्तम्माधवीये स्कान्दे प्रदोषव्यापिनी ग्राह्या सदा नक्तव्रते तिथिः उ
१८ दयस्था सदा पूज्या हरिनक्तव्रते तिथिरिति प्रदोषव्याप्त्यभावे दिवैव नक्तमुक्तं गृहस्थस्य स्कान्दे प्रदोषव्यापिनी
तस्माद्दिवा नक्तं विधीयते आत्मनो द्विगुणच्छायामतिक्रामति भास्करे तन्नक्तं नक्तमित्याहुर्न नक्तं निशि भोज
नमिति एवं ज्ञात्वा ततो विद्वान् सायाह्ने तु भुजक्रिया कुर्यान्नक्तव्रती नक्ते फलं भवति निश्चितमिति सौरनक्ते तु
स्तमं तुः त्रिमुहूर्त्तं स्पृगेवाह्नि निशि चैतावती तिथि तस्यां सौरं भवेन्नक्तमहन्येव तु भोजनं यतेश्च विधवायाः
श्च दिवैव नक्तमुक्तं स्मृत्यन्तरे नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः यतिश्च विधवा चैव कुर्यात्तु सदिवाकरं
सदिवाकरं तु तस्योक्तमंतिमेव घटिकाद्वयं इति हेमाद्रौ व्यासः हविष्यभोजनं स्नानं सत्यमाहारलाघवं अग्निका
कार्यमधःशय्यां नक्तभोजी षडाचरेत् तृतीये अयाचितं तत्रास्मिन्नक्ते रात्रे यामतन्त्रभोक्ष्यं इति संकल्परूपं १८

18

अयाचितान्नभोजनफलमुक्तं माधवीये स्मृत्यंतरे अयाचिताशी मितभुक् परां सिद्धिमवाप्नुयादिति चतुर्थ्यां तूपवासः
एवं कृते यथोक्तफलसिद्धिर्भवति माघकृष्णचतुर्थ्यां संकष्टचतुर्थीव्रतारंभ उक्तो भविष्योत्तरे माघमासे कृष्णपक्षे
चतुर्थ्यां व्रतमुत्तमं प्रतिमासं प्रकुर्वीत व्रतं संकष्टनाशनमिति माघकृष्णचतुर्थ्यां व्रतारंभं कृत्वा प्रतिमासं कार्यमि
त्यर्थः इयं चंद्रोदयव्यापिनी ग्राह्या पूजा विधूदये कार्या सिंहरेण प्रपूजयेदिति तत्रैवोक्तेः माघशुक्लचतुर्थीति
लचतुर्थी तदुक्तं काशीखंडे माघशुक्लचतुर्थ्यां च नक्तव्रतपरायणः येत्वां धुंढेर्चयिष्यंति तेर्च्यास्सुरासुरैरिह॥
विधाय वार्षिकीं यात्रां चतुर्थीं प्राप्य तापसी शुक्लां तिलान् गुडैर्बध्वा शश्रीयाल्लडुकान् व्रती इयं प्रदोषव्यापिनी
ग्राह्या नक्तग्रहणात् तापसी माघी इयमेव कुंदचतुर्थीत्युक्तं देवीपुराणे माघमासे तु संप्राप्ते चतुर्थी कुंदसंयुता
सा तु पोष्या सुरश्रेष्ठ ततो राज्यं भविष्यतीति अथ फाल्गुनादिचतुर्षु मासेषु चतुर्थीव्रतमुक्तं वाराहपुराणे अ
थ विघ्नव्रतं राजन् कथयामि शृणुष्व तत् चतुर्थ्यां फाल्गुने मासि गृहीतव्यं व्रतं त्विदं नक्ताहारेण राजेंद्र तिला

ति त्रेपारणं स्मृतं तद्देवाग्रौ च होतव्यं तद्देयं ब्राह्मणेषु च चातुर्मास्यव्रतं चैव कृत्वैवं पंचमे तथा सौवर्णं गजवक्त्रं तु सं
ति ल्लाविप्राय दापयेत् एवं कृत्वा व्रतं चैव सर्वविघ्नैर्विमुच्यते इत्यादि मंत्रस्तत्रैव दिव्याय शूराय गजाननाय लंबोदरा
१२ एयैकरदाभिदाय नागात्मजादेहसमुद्भवाय कुठारहस्ताय नमो वराय अनेन मंत्रेण पूजां कृत्वा स्वाहांतेन तिला
न्हुत्वा ब्राह्मणेभ्योपि दत्वा स्वयमपि तदेव नक्तकाले ऽश्नीयात् अंते सौवर्णीं प्रतिमां संपूज्य ब्राह्मणाय दद्यात्
अत्र विशेषाद्भुतारंभे शुक्ला चतुर्थी ग्राह्या एतन्निर्बलान्यप्यविशेषाच्चतुर्थी तु तृतीयायामिति सामान्यवाक्यात्तृतीया 19
युक्ते चतुर्थ्यां कार्याणि चतुर्थी शनिवारेण सिद्धा गुरुवारेण विरुद्धा योगिन्यत्र नैर्ऋत्यामिति चतुर्थी निर्णीता
अथ पंचमी निर्णीयते सा चतुर्थीयुक्तैव ग्राह्या तदुक्तं माधवीस्कांदे पंचमी च तथा कार्या चतुर्थीसंयुता विभो इ
ति चैत्रशुक्लपंचम्यां श्रीपूज्योक्ता हेमाद्रौ मात्स्ये शुक्लायामथ पंचम्यां चैत्रे मासि शुभानना श्रीब्रह्मलो
कान्मानुष्यं संप्राप्ता केशवाज्ञया ततस्तां पूजयेत्तत्र यस्तं लक्ष्मीर्न मुंचतीति इयं कल्पादिरपि कल्पादयस्तु २६

क्लाहे माद्वैमान्स्य वैशाखस्य तृतीयायाश्च स्साया फाल्गुनस्य च पंचमी चंद्र मासस्य तस्यैवान्या तथापरा शुक्ला
त्रयोदशी माघे कार्त्तिकस्य तु सप्तमी नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहं कल्पानामादयो ह्येता दत्तस्या
क्षयकारकाः अत्रा विशेषाद्युगादिवन्निर्णयो ज्ञेयः श्रावणशुक्लपंचमी नागपंचमी सापरविद्धेत्युक्तं चमत्कार
चिंतामणौ पंचमी नागपूजायां कार्या षष्ठी समन्विता तस्यां तु तुषिता नागा इतरा स चतुर्थिकेति श्रावणे पं
चमी शुक्ला संप्रोक्ता नागपंचमी तां परित्यज्य पंचम्यां चतुर्थी सहिता विभो इति प्रतापमार्त्तंडे स्कांदे त्वन्नरात्र अ
त्र नागपूजनमुक्तं गोविंदार्णवे भविष्ये श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप द्वारस्योभयतो लेख्या गोमये
न विषोल्वणाः पूजयेद्विधिवद्वीर दध्यदूर्वांकुरैः कुशैः गंधपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः एतस्यां पूजयं
ति ये नागान्भक्तिपुरःसराः न तेषां सर्पतो वीर भयं भवति कुत्रचित् अस्यां नागकुंडे स्नानमुक्तं काशीखंडे यः स्ना
तो नागपंचम्यां कुंडे वासुकिसंज्ञिके न तस्य विषसंसर्गो भवेत्सर्पसमुद्भव कर्त्तव्या नागपंचम्यां यात्रा वर्षास

ति नरवै नागाप्रसन्नाजायंतेकुलेतस्यापिसर्वदेति भाद्रशुक्लपंचमीऋषिपंचमी इयंचविशेषात्स्त्रीजनेषुसर्वेषु
थि मध्याह्नव्यापिनीतिथिरितिमाधवीयेहारीतोक्तेर्मध्याह्नव्यापिनीग्राह्या अत्रऋषिपूजनमुक्तंब्राह्मे नभस्यशुक्ल
२० पक्षेतुयदाभवतिपंचमी नद्यादिकेतथास्नात्वाकृत्वानियममेवच तथाययोक्तप्रकारेणब्राह्मणःक्षत्रियावैश्याः
शूद्रावापिव्रतनेन कृत्वानैमित्तिकंकर्मगत्वानिजगृहंपुनः वेदिंसम्यक्प्रकुर्वीत गोमयेनोपलिप्यतां तत्रस
प्तऋषीन्दिव्यान्भक्तियुक्तःप्रपूजयेत् अत्रयश्च कश्यपोत्रिभरद्वाजोविश्वामित्रोथगौतमः जमदग्निर्वसिष्ठश्च
सप्तैतेऋषयःस्मृताइति आश्विनशुक्लपंचम्यामुपांगललितांव्रत तन्मध्याह्नव्यापिन्यांकन्यांतत्रैवपूजाविधा २०
नात् अत्रैवेंद्राण्याःसकृत्कुशमयंनागंपूजयेदित्युक्तंनिर्णयामृतेभविष्ये तथाचाश्वयुजेमासिपंचम्यांकुरुनंद
न कृत्वाकुशमयंनागमिंद्राण्यासहपूजयेत्इति मार्गशुक्लपंचम्यपिनागपंचमीतदुक्तंहेमाद्रौस्कांदे शु
क्लेमार्गशिरेपुण्याश्रावणेयाचपंचमी स्नानैर्दानैर्बहुफलानागलोकप्रदायिनीति इयंपंचमीनागपूजायांका २०

त्वा भौमयोगेन सार्वं पेतीह कीर्त्तितेति इयमेव सूर्यषष्ठी तदुक्तं निर्णयामृते भविष्ये शुक्ले भाद्रपदे षष्ठ्यां स्नानं
भास्करपूजनं प्राशनं पंचगव्यस्य अश्वमेधफलप्रदमिति अस्यामेव दक्षिणापथस्य कार्त्तिकेयदर्शनमुक्तं तत्रैव
योयं भाद्रपदे मासि षष्ठी स्यान्नरर्षभ इयं पापहरा प्रोक्ता शिवा शान्ता शुभा नृप स्नानदानादिकं सर्वमस्यामक्ष
यमुच्यते अस्यां पश्यंति गांगेयं दक्षिणापथमाश्रितं ब्रह्महत्यादिपापैस्तु मुच्यते नात्र संशय इति आश्विनशु
क्ल षष्ठ्यां दिवसत्रयसाध्यपूजांगत्वेन बिल्वाभिमंत्रणं कुर्यात् तदुक्तं देवीपुराणे ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वा
भिमंत्रणं सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनं पूर्वाषाढायुतायामष्टम्यां पूजाहोमाद्युपोषणं उत्तरेण नवम्यां
तु बलिभिः पूजयेच्छिवं श्रवणेन दशम्यां तु प्रणिपत्य विसर्जयेदिति अथामंत्रणप्रकारः बिल्वाभ्याशं गत्वा बिल्वं
संपूज्य नाममंत्रेण बिल्वस्थे तु दुर्गां च संपूज्य प्रार्थयेत् ॥ ॥ अत्र मंत्रः रावणस्य वधार्थाय रामस्यानुग्रहाय च
अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा अहमप्याश्विने षष्ठ्यां सायाह्ने बोधयाम्यतः अथामंत्रणमंत्रः श्री

ति शैलशिखरे जातन श्रीफल श्रीनिकेतन तेनत्वमोसि मयाहूत स्कन्दो दुर्गास्वरूपत इति आनयनप्रकारः सप्तम्यां दत्ता
नि नेकार्त्तिकशुक्लषष्ठ्यां वह्निरूपतो ज्ञाकाल दर्शं मत्स्यपुराणे वृश्चिकार्के शुक्लषष्ठी भौमवारे पुष्यस्थिते महाषष्ठीति
२२ सा प्रोक्ता सर्वपापहरा तिथिः तस्यां स्वपिति वैवह्निः पूर्वत्रोपोष्य वै दिने षष्ठ्यां वह्निं समभ्यर्च्य कुर्याद्वह्निमहोत्स
वमिति वृश्चिकार्के कार्त्तिके इति तत्रैव ख्यातं मार्गशुक्लषष्ठी चंपाषष्ठी तदुक्तं मल्लारिमाहात्म्ये मार्गभाद्रप
दे शुक्ला षष्ठी वैधृतिसंयुता रविवारेण संयुक्ता सा चंपेति प्रकीर्त्तिता वैधृतियोगकथनं तु भाद्रशुक्लषष्ठ्यभि
प्रायेण अस्यां वैधृतियोगस्य सर्वथासंभवात् अस्यां विश्वेश्वरदर्शनमुक्तं तत्रैव मार्गशीर्षेमले पक्षे षष्ठ्यां वारेशु
मालिनः शततारागते चंद्रे लिंगं स्याद्दृष्टिगोचरमिति स्यादित्यनेन दृष्टिगोचरं कर्त्तव्यमिति उच्यते इयमुक्तयोग
युता सर्वा योगाभावे सप्तमीयुता ग्राह्या विशेषात् इयमपि स्कंदषष्ठी तदुक्तं निर्णयामृते भविष्योत्तरे येयं मार्ग
शिरे मासि षष्ठी भरतसत्तम पुण्या पापहरा धन्या शिवा शांता गुहप्रिया निहत्य तारकं षष्ठ्यां गुरुस्तारकारा २२

नवत् रराजनेनुदयिनाकार्त्तिकेयस्य सा तिथिः स्नानदानादिकं कर्मतस्यामत्रयमुच्यते इति दिक् षष्ठी
शुक्रेण भौमेन सिंह्या शनिवारेण विरुद्धा योगिन्यत्र पश्चिमायामिति षष्ठीनिर्णीता अथ सप्तमीनिर्णीयते ॥
सा पूर्वोक्ता स्कांदे षष्ठ्या युता सप्तमी च कर्तव्या तात न सर्वदेति चैत्रशुक्लसप्तम्यां श्रीभास्करं दमनकादिभिः पू
जयेदित्युक्तं निर्णयामृते देवीपुराणे भास्करस्य तु सप्तम्यां पूजनं दमनकादिभिः कृत्वाप्नोति भोगादीन्विगतारि
मतत्न पद इति वैशाखशुक्लसप्तमी गंगासप्तमी अस्यां गंगापूजनं कार्यमित्युक्तं ब्राह्मे वैशाखे शुक्लसप्तम्यां जह्नु
ना जाह्नवी स्वयं क्रोधात्पीता पुनस्त्यक्ता कर्णरंध्रात्तु दक्षिणात् तां तत्र पूजयेद्देवीं गंगां गगनमेखलामिति वि
शेषवचनाभावादियं पूर्वोक्तव्यापिनी ग्राह्या दिनद्वये तद्व्याप्तावव्याप्तौ वा सामान्यनिर्णयात्पूर्वैव आषाढशुक्ल
सप्तम्यां सूर्यपूजोक्ता निर्णयामृते ब्रह्मपुराणे आषाढशुक्लसप्तम्यां विवस्वान्नाम भास्करः जातः सर्वोस्तु तस्मा
त्तं तत्रोपोष्य यजेत्सदा रथोचक्राङ्कतोरस्यमंडलं सर्वकामदं भक्ष्यैर्भोज्यैस्तथा पेयैः पुष्पैर्धूपैर्विलेपनैर्दीपिना

आश्विनशुक्लसप्तमीदेवीपूजने श्रीसूर्योदययुता ग्राह्या तदुक्तं प्रतापमार्तण्डे भविष्ये युगाद्या वर्षवृद्धिश्च स
प्तमी पार्वतीप्रिया रवेरुदयमीक्षंते न तत्रास्तु तिथियुग्मतेति वर्षवृद्धिर्जन्मतिथिः दिनद्वयसत्वे परा ग्राह्या अ
स्यामेव त्रिरात्रारंभः कार्यः त्रिरात्रं वापि कर्त्तव्यं सप्तम्यादिदिनत्रयमिति धौम्योक्तेः अत्र सावित्रीव्रतवन्नवम्यन्तरो
धेनु त्रिरात्रं कार्यमिति केचित् युक्तं तु प्रतिपन्नवरात्रारंभवत्सप्तम्यामेवारंभणीयमिदं तदुक्तं भविष्योत्तरे व्र
तीच पूजयेद्देवीं सप्तम्यादिदिनत्रये द्वाभ्यां चतुरहोभिर्वा ह्रासवृद्धिवशात्तिथेः भवानीतुष्टये पार्थ संवत्स
रसुखाय च भूतप्रेतपिशाचानां नाशार्थं चोत्सवाय चेति इदं च त्रिरात्रानुष्ठानं काम्यं फलश्रवणात् अत्र दारु 23
सदनस्यापि तां दुर्गां पूजयेदित्युक्ते निर्णयामृते भविष्ये सप्तम्यां नवगेहानि दारुजानि नवानि च एकं वावि
त्तभावेन कारयेत्सुसमाहितः दुर्गागृहं प्रकर्त्तव्यं चतुरस्रं सुशोभनं तन्मध्ये वेदिकां कुर्याच्चतुर्हस्तां शुभां समां
तस्यां सिंहासनं सौम्यं कंबलाजिनसंयुतं तत्र दुर्गां प्रतिष्ठाप्य सर्वलक्षणसंयुतां पूजयेत्प्रयतो देवीं नरोत्ति २३

यममास्थितइति वेदिकायांकुर्यात्हस्तलंबंदेवफलतोद्ध्येयं अस्यांषष्ठ्यामामंत्रितांबिल्वशाखामानीयपूजयेदि
त्युक्तं ज्योतिःशास्त्रे आश्विनस्यसितेपक्षेसमुहूर्तेनसप्तमी तस्यांचपत्रिकापूजाकर्त्तव्यानवनायकैः प्रशस्तां
सफलांबिल्वशाखामाहृत्यपूजयेदिति आनयनप्रकारः बिल्ववृक्षंतुदुर्गांचसंपूज्यप्रार्थयेत् तत्रमंत्रः बि
ल्ववृक्षमहाभागसर्वदाशंकरप्रिय गृहीत्वांतवशाखांतुदुर्गापूजांकरोम्यहं शाखाच्छेदोद्भवंदुःखंनच
कार्यंत्वयाप्रभोइति ततःफलयुतांवानस्यत्वेतिमंत्रेणशाखांछित्वातांगृहमानीयसंपूज्यस्थापयेत् त
बिल्वामंत्रणप्रकारस्त्वाश्विनशुक्लषष्ठ्यामुक्तः अत्रैवमूलनक्षत्रेपुस्तकस्थापनंकार्यं मूलर्क्षेसुराधीशपू
जनीयासरस्वती पूजयेत्सत्यहंदेवींयावद्वैष्णवमृक्षकं नाध्यापयेन्नचलिखेन्नाधीयात्कदाचन पुस्तके
स्थापितेदेवविद्याकामोद्विजोत्तमइतिरुद्रयामलात् वैष्णवंश्रवणंनक्षत्रंसंग्रहेपि आश्विनस्यसितेप
क्षेमेधाकामःसरस्वतीं मूलेनावाहयेद्देवीं श्रवणेनविसर्जयेदिति मार्गशीर्षादिचतुर्मासेषुकृष्णपक्षे

सप्तम्यांपूर्वेद्युःश्राद्धंकार्यं तदुक्तंकालादर्शे मार्गशीर्षेचपौषेच माघेप्रोष्ठेचफाल्गुने कृष्णपक्षेषुपूर्वेद्युरा
न्वष्टकंतथाष्टकाइति अष्टकाश्राद्धात्पूर्वेद्युरित्यर्थः अष्टकास्त्वष्टमीनिर्णयेवक्ष्यंते अत्राष्टमीश्राद्धानुरोधेन
पूर्वेद्युः श्राद्धंकार्यंनापराह्णादिव्याप्त्यात्रनिर्णयः मार्गशीर्षशुक्लसप्तमीमित्रसप्तमीतस्यांमित्रपूजायु
क्तंनिर्णयामृतेब्रह्मपुराणेसप्तमीप्रकरणे यद्विष्णोर्दक्षिणंनेत्रंतद्देवाह्निकमस्तुनः अदितेःकश्यपाज्जज्ञेमि
त्रोनामदिवाकरः सप्तम्यांतेनसाख्यातालोकेस्मिन्मित्रसप्तमी षष्ठ्यांचवपनंकार्यंततःस्नात्वायतेंद्रि
नैत्रोपवासःकर्त्तव्योभक्ष्याण्येवफलानिच सप्तम्यांराधनंकार्यंतस्मैमित्रायभानवे नानाकुसुमसंभारै 24
र्भक्ष्यैःपिष्टमयैःशुभैः मधुनाचप्रभूतेनहोमजाप्यसमाधिभिः ब्राह्मणान्भोजयेत्पश्चाद्दीनानाथांश्चमान
वान् रात्रौजागरणंकार्यंनृत्यगीतपुरःसरं अष्टम्यांसंविभोज्याथतथाचनटनर्त्तकाः द्विजद्वयेचभोक्तव्य
मिष्टमन्नंमधुप्लुतमिति अत्रपूर्वदिनेकृतवपनःस्नात्वारविंसंपूज्यफलादिभक्षणेनोपवासंसंपाद्यततः २४

सप्तम्यांकुसुमैर्नानाभक्ष्यैर्मधुरान्नपिष्टयुक्तैराराधनंकृत्वायथोक्तविधिनायथाशक्त्यासूर्यमंत्रंजपेत् ज
पादिविधिस्तुमत्कृताचारार्केद्रष्टव्यः जपादशांशेनहोमंकृत्वाब्राह्मणादीन्संभोज्यरात्रौजागरणंकुर्यात् त
तोष्टम्यांसूर्यंसंपूज्यगायकादीन्संभोज्यस्वयंदिनद्वयेपिमधुरान्नंतत्पिष्टंभुंज्यात् दिनद्वयेनसप्तम्यामष्टम्यां
चेतिप्रयोगः माघशुक्लसप्तमीरथसप्तमी सारुणोदयव्यापिनीग्राह्या तदुक्तंविष्णुना सूर्यग्रहणतु
ल्यातुशुक्लामाघस्यसप्तमी अरुणोदयवेलायांतस्यांस्नानंमहाफलमिति अयंचस्नानकालोरुणोद
येमाघेस्नातितान्यत्रैव अन्यांत्वतितुश्रीसूर्योदयः माघमासस्यसप्तम्यामुदयत्येवभास्करे विधिवत्तत्र
वस्नानंमहापातकनाशनमित्यपरार्केविष्णूक्तेः विधवद्दीपदानादिकृत्वेत्यर्थः दीपदानविधिर्हेमा
द्रौभविष्ये सौवर्णेराजतेताम्रेभक्त्यालाबुमयेथवा तैलेनवर्त्तिंदातव्यामहारजनरंजिता समाहित
मनाभूत्वा दत्वाशिरसिदीपकं भास्करंहृदयेध्यात्वाइमंमंत्रमुदीरयेत् नमस्तेरुद्ररूपायरसानांपतयेनमः

वरुणायनमस्तेस्तुहरिवासनमोस्तुते जलेपरिहरेद्दीपंध्यात्वासंतर्प्यदेवता परिहरेदुत्सृजेत् महार
जनंकुसुमं मकारजनमुद्दिश्यशतंकुंभंकुसुंभयोरिति महेश्वरकोशात् अस्यामर्घ्यदानमप्युक्तं भविष्यो
त्तरे माघेमासिसितेपक्षेसप्तमीकोटिभास्करा कुर्यात्स्नानार्घ्यदानाभ्यामायुरारोग्यसंपद इति अर्घ्यस्तत्र
सौरागमे अर्कपत्रैःसबदरैःदूर्वाक्षतसचंदनैः अष्टांगविधिनाचार्घ्यंदद्यादादित्यतुष्टये अर्घ्यदानमंत्रोमदन
रत्नेसप्तसप्तवहप्रीतसप्तलोकप्रदीपन सप्तमीसहितोदेवगृहाणार्घ्यंदिवाकर अस्यांरथदानमुक्तंभवि 25
ष्योत्तरेएवंविधंरथवरंरथवाजियुक्तंहैमंचहैमंशतदीधितिनामसमेतं दद्याच्चमाघसितसप्तमिवासरेयः
सोसंगचक्रगतिरेवमहींभुनक्तिइयमेवरविवारयुक्तातत्रयुक्तामहतीत्युक्तं निर्णयामृतेसप्तमीप्रकरणे
रविवारेणयुक्तायांसप्तम्यामुत्तरायणे पुन्नामनिचनक्षत्रेपूजयेच्चदिवाकरमिति उत्तरायणेमाघेइतिव्या
ख्यातंपुन्नामनक्षत्राणिचज्योतिःशास्त्रेउक्तानि हस्तोमैत्रस्तथापुष्योमृगशीर्षंपुनर्वसुः पुन्नामधेयन २५

अपरं तु प्रतिपत्सद्वितीया स्याद्द्वितीया प्रतिपद्युतेति तत्कृष्णपक्षयुग्मनिर्णायकं इयमेवाशोकाष्टमी अस्या
मशोककलिकाप्राशनं कार्यं तदुक्तं लिंगपुराणे अशोककलिकाश्चाष्टौ ये पिबंति पुनर्वसौ चैत्रे मासि सिताष्टम्यां
न ते शोकमवाप्नुयुरिति प्राशनमंत्रस्तत्रैव त्वामशोकं हिवाभीष्टं मधुमाससमुद्भवं पिबामि शोकसंतप्तो माम
शोकं सदा कुर्विति अशोककालिकाप्राशने त्वियं नक्षत्रयोगवशात्पूर्वा परा वा ग्राह्या नक्षत्रायोगेपि केव
लाष्टम्यां कार्या तिथिः शरीरं तिथिरेव कारणं तिथिः प्रमाणं तिथिरेव साधनमिति लल्लोक्तेः एतेन नक्षत्रयोगे
कर्मलोप इत्युक्तं सिंधुकारज्येष्टैस्तदपास्तं अत्र विशेषस्तिथितत्वे कालिकापुराणे चैत्रे मासि सिताष्टम्यां यो न
रो नियतेंद्रियः स्नायाल्लौहित्यतोये तु स याति ब्रह्मणः पदमिति लोहितो ब्रह्मपुत्रः स्नानमंत्रस्तत्रैव ब्रह्मपु
त्र महाभाग शंतनोः कुलसंभव अमोघागर्भसंभूत पापं लौहित्य मे हरेति पुनर्वसुबुधवाराभ्यां युक्तोयं प्रशस्त
इत्युक्तं एथ्वीचंद्रोदये विसुना पुनर्वसुबुधोपेता चैत्रे मासि सिताष्टमी प्रातस्तु विधिवत्स्नात्वा वाजपेयफलं लभेदिति॥

वैशाखशुक्लाष्टम्यामाम्ररसेन स्नानमुक्तं निर्णयामृते देवीपुराणे सहकारफलैः स्नानं वैशाखेष्टमीदिने ॥
आत्मनादेवतां स्नाप्य मांसीबालकवारिभिः मांसीजटामांसीबालकमुशीरं तत्रैव संवत्सरप्रदीपे देव्याः
पूजांप्रकुर्वीतकेनकाचपकेनच शर्कराक्षीरनैवेद्यं कन्याविप्रेषुभोजनं आत्मनः पारणंतद्वद्वित्तिं णोश
क्तितोददेत् सर्वतीर्थाभिषेकंत्वनेन प्राप्नोति भार्गवेति अथ ज्येष्ठशुक्लाष्टम्यां त्रिलोचनपूजनमुक्तं भविष्यो
त्तरे ज्येष्ठेमासि द्विजश्रेष्ठशुक्लाष्टम्यां त्रिलोचनम् यः पूजयति देवेशं ईशलोकं व्रजेन्नरः इति ज्येष्ठशुक्लाष्टम्यां
शुक्लांदेवीपूजयेदित्युक्तं निर्णयामृते ब्रह्मपुराणे शुक्लाष्टम्यां तु राज्ञानाम्शुक्लादेवीमहानिशि वधायदान 27
वेंद्राणांशुक्लपक्षेततोजयेदिति आषाढशुक्लाष्टम्यां महिषघ्नीं देवीं पूजयेदित्युक्तं देवीपुराणे अष्टम्यां चत
थाषाढे निशान्तायेन स्नापयेत्तु स्वयं स्नात्वा च कर्पूरैश्चन्दनैस्तां विलेपयेत् भक्ष्यान् शर्करया चूर्णान् पानकानि शु
भानि च शक्तितो दर्शितान् दद्यान्महिषघ्नी च कीर्त्तयेदिति निशाहरिद्रा अत्र सामान्यनिर्णयो ज्ञेयः अत्र २०

।हर्त्रिंशो योगिगणैकवंद्यं गोपीसुतं तं नीलतनुं प्रणम्य विभाव्य मातामह संप्रदायं कृष्णाष्टमीनिर्णयमा
तनोमि श्रावणे कृष्णाष्टमी जन्माष्टमीत्युच्यते तदुक्तं स्कांदे अष्टमी श्रावणे मासि कृष्णपक्षे यदा भवेत्
कृष्णजन्माष्टमी ज्ञेया महापातकनाशिनीति इयं अर्द्धरात्रव्यापिनी ग्राह्या तदुक्तं पुराणसमुच्चये श्राव
णे बहुले पक्षे कृष्णजन्माष्टमीव्रतं रात्रियुक्तां प्रकुर्वीत विशेषेणेंदुसंयुतामिति श्रावणपदं मुख्यामां
तमासपरं अत्र दिनद्वये सत्वे वा किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति नवमीयोगप्राशस्त्यादुज्जेनी
याग्राह्यत्वेन सप्तमीसंयुताष्टमीति सप्तमीयोगनिषेधाच्च परयुतैव ग्राह्या इयमेव रोहिणीयुक्ता जयंती
तदुक्तं वह्निपुराणे कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी यदि जयंती नाम सा प्रोक्ता उपोष्या सा प्रयत्नत
इति स्कांदेपि प्राजापत्येन संयुक्ता अष्टमी तु यदा भवेत् श्रावणे बहुले सा तु सर्वपापप्रणाशिनी जे
यं पुण्यं च कृतं तेन जयंतीं तां विदुर्बुधा इति अयं च रोहिणीयोगोर्द्धरात्र एव मुख्यः तदुक्तं वसिष्ठेन अष्ट

मीरोहिणीयुक्तानिशर्द्धेदृश्यतेयदि मुख्यकालःसविज्ञेयस्तत्रजातःस्वयंहरिरिति भविष्येपि रोहि
ण्यामर्द्धरात्रेचयदाकृष्णाष्टमीभवेत् तस्यामभ्यर्चनंशौरेर्हंतिपापंत्रिजन्मजं विष्णुधर्मोत्तरेच प्राजा
पत्यर्क्षसंयुक्ताकृष्णानभसिचाष्टमी सोपवासोहरेःपूजांकृत्वातत्रनसीदति अर्द्धरात्रेतियोगोयंतारा
पत्युदयेसतीति तथातत्रैवसमंयोगेनतुरोहिण्यानिशीथेराजसत्तम समजायतगोविंदोबालरूपीच
तुर्भुजः तस्मात्तंपूजयेत्तत्रनिशीथेराजसत्तमेति इयमपिदिनद्वयसत्वेत्तत्रैव तदुक्तंब्रह्मवैवर्ते वर्ज्जनी
याप्रयत्नेनसप्तमीसहिताष्टमी तदासैवोपोष्या तदुक्तंवह्निपुराणे सप्तमीसंयुताष्टम्यांनिशीथेरोहिणी
यदि भवितासाष्टमीपुण्यायावच्चंद्रदिवाकराविति गारुडेपि जयंत्यांपूर्वविद्धायांउपवासंसमाचरेदि
ति यदापूर्वेद्युरोहिणीयुक्ताष्टम्यर्द्धरात्रेपरेद्युरोहिणीयुक्ताप्यष्टमीनार्द्धरात्रगातदापूर्वेद्युरोहिणीर
हितापिनिशीथगेवग्राह्यासमंयोगेनतु रोहिण्यानिशीथेराजसत्तम समजायतगोविंदोबालरूपीच २८